उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

## संस्कृत प्रतिभा खोज - 2024

संस्कृत गीत प्रतियोगिता (बाल एवं युवा वर्ग) के लिए अनुशंसित संस्कृत गीत

**नोटः-** संस्कृत गीत प्रतियोगिता (बाल वर्ग) के प्रतिभागी जनपद, मंडल तथा राज्यस्तर की प्रतियोगिता में संस्कृत गीत प्रतियोगिता हेतु अनुशंसित गीत के खण्ड – 1 से 01 सम्पूर्ण गीत का गायन करेंगें।

संस्कृत गीत (युवा वर्ग) के प्रतिभागी मंडल स्तर की प्रतियोगिता में खण्ड – 1 से 01 सम्पूर्ण गीत तथा राज्यस्तरीय प्रतियोगिता में खण्ड – 1 से 01 सम्पूर्ण गीत के अतिरिक्त खण्ड – 2 से 01 सम्पूर्ण गीत का गायन करेंगें।

**खण्ड – 1**

### (1) वन्दे सदा स्वदेशम्!!

गङ्गा पुनाति भालं रेवा कटिप्रदेशम्

वन्दे सदा स्वदेशम्

एतादृशं स्वदेशम्!!

काशी-प्रयाग-मथुरा-वृन्दाटवी-विशालाः

द्वारावती-सुकाञ्ची-विदिशादि-तीर्थमालाः

सम्भूषयन्ति कामं यस्य प्रशान्तवेषम्

वन्दे सदा स्वदेशम्

एतादृशं स्वदेशम्!!

सलिलं सुधामधुरितं पवनोऽपि गन्धवाही

चरितं विकल्पकलितं धर्मो दयावगाही

यत्प्राङ्गणं शबलितं कौतुहलैरशेषम्

वन्दे सदा स्वदेशम्

एतादृशं स्वदेशम्!!

*साभार- वाग्वधूटी*
*लेखक – प्रो. अभिराज राजेन्द्र मिश्र*

**(2) भवतु भारतम्**

(संचलन -गीतम्)

शक्तिसम्भृतम् । युक्तिसम्भृतम् ।

शक्ति - युक्ति सम्भृतम् । भवतु भारतम् ।।ध्रु०।।

शस्त्रधारकम् । शास्त्रधारकम् ।

शस्त्र-शास्त्र-धारकम् भवतु भारतम् ।।१ ।।

नीतिसंस्कृतम् । रीतिसंस्कृतम् ।

नीति- रीति-संस्कृतम् । भवतु भारतम् ।।२।।

कर्मनैष्ठिकम् । धर्मनैष्ठिकम् ।

कर्म-धर्म-नैष्ठिकम् । भवतु भारतम् ।।३।।

भुक्तिसाधकम् । मुक्तिसाधकम् ।

भुक्ति-मुक्तिसाधकम् । भवतु भारतम् ।।४।।

*तीर्थभारतम् से साभार*
*लेखक- श्रीधर भास्कर वर्णेकर*

(3) सैन्य-गीतम्

**सादरं समीहताम्**

सादरं समीहतां वन्दना विधीयताम्।

श्रद्धया स्वमातृभूसमर्चना विधीयताम्॥

आपदो भवन्तु वा विद्युतो लसन्तु वा।

आयुधानि भूरिशोऽपि मस्तके पतन्तु वा।

धीरता न हीयतां वीरता विधीयताम्

निर्भयेन चेतसा पदं पुरो निधीयताम् ॥ १॥

प्राणदायिनीयं त्राणदायिनीयम्।

शक्तिमुक्तिभक्तिदा सुधाप्रदायिनीयम्।

एतदीयवन्दने सेवनेऽभिनन्दने।

साभिमानमात्मनो जीवनं प्रदीयताम्॥ २॥

*लेखक- पं. वासुदेव द्विवेदी शास्त्री*

(4) **चल चल पुरतो निधेहि चरणम्**

चल चल पुरतो निधेहि चरणम्

सदैव पुरतो निधेहि चरणम्

गिरिशिखरे तव निजनिकेतनम्
समारोहणं विनैव यानम्
आत्मबलं केवलं साधनम्
सदैव पुरतो निधेहि चरणम्

पथि पाषाणा विषमाः प्रखराः
तिर्यञ्चोऽपि च परितो घोराः
सुदुष्करं खलु यद्यपि गमनम्
सदैव पुरतो निधेहि चरणम्

प्रयत्न साध्या लोके नीतिः
समाजदानिनी कुशला भूतिः
तस्मात् साधय सत्वरक्षणम्
सदैव पुरतो निधेहि चरणम्

जहीहि भीतिं हृदि भज शक्तिम्
देहि देहि रे भगवती भक्तिम्
कुरु कुरु सततं ध्येयस्मरणम्
सदैव पुरतो निधेहि चरणम्

चल चल पुरतो निधेहि चरणम्

सदैव पुरतो निधेहि चरणम्

सदैव पुरतो निधेहि चरणम्

*तीर्थभारतम् से साभार*

*लेखक- श्रीधर भास्कर वर्णेकर*

**(5) प्रियं भारतं सर्वथा दर्शनीयम्**

प्रकृत्या सुरम्यं विशालं प्रकामं

सरित्तारहारैः ललामं निकामम् ।

हिमाद्रिर्ललाटे पदे चैव सिन्धुः

प्रियं भारतं सर्वथा दर्शनीयम् ॥ १॥

धनानां निधानं धरायां प्रधानं

इदं भारतं देवलोकेन तुल्यम् ।

यशो यस्य शुभ्रं विदेशेषु गीतं

प्रियं भारतं तत्सदा पूजनीयम् ॥ २॥

अनेका प्रदेशाः अनेकाश्च वेशाः

अनेकानि रूपाणि भाषा अनेकाः ।

परं यत्र सर्वे वयं भारतीयाः

प्रियं भारतं तत्सदा रक्षणीयम् ॥ ३॥

सुधीरा जना यत्र युद्धेषु वीराः

शरीरार्पणेनापि रक्षन्ति देशम् ।

स्वधर्मानुरक्ताः सुशीलाश्च नार्यः

प्रियं भारतं तत्सदा श्लाघनीयम् ॥ ४॥

वयं भारतीयाः स्वभूमिं नमामः

परं धर्ममेकं सदा मानयामः ।

यदर्थं धनं जीवनं चार्पयामः

प्रियं भारतं तत्सदा वन्दनीयम् ॥ ५॥

*लेखक- आचार्य चंद्रभानु त्रिपाठी*

**(6) रत्नगर्भा धरा सुस्मिता श्यामला**

रत्नगर्भा धरा सुस्मिता श्यामला

दिव्यतीर्थास्तटाः पर्वताः सिन्धवः ।

निर्झराः वाटिकाश्चात्र देवालयाः

भव्यमेतत्प्रियं भारतं भूतले ॥1॥

वेदशास्त्राणि साहित्यकाव्यानि वा

यत्र यच्छन्ति लोकाय सत्प्रेरणम् ।

रम्यरामायणं श्रीमहाभारतं

राष्ट्रमेतद्वरं भारतं भूतले ॥2॥

यत्र देवी सती शारदा जानकी

चानुसूया शिवा द्रौपदी पद्मिनी ।

सन्ति सर्वा इमाः वत्सलाः मातरः

शक्तियुक्तं शिवं भारतं भूतले ॥3॥

रामकृष्णौ हरी वर्धमानो जिनो

गौतमः शङ्करः पाणिनिर्नानकः ।

श्री दयानन्द साधुश्च देशेऽभवन्

देशिकानामिदं भारतं भूतले ॥4॥

भारतीयाः स्वभावेन शान्तिप्रियाः

ज्ञानविज्ञानसेवारताः कर्मठाः ।

मानवी भावना भासते संस्कृतौ

सत्यसंशोधकं भारतं भूतले ॥5॥

*लेखकः -आचार्य राधाकृष्ण मनोडी*

**(7) ध्येया धरणीयम्**

जननीयम्, मम जननीयम्, भारतधरणीयम्

पावनचरितेयम्, श्रितजनवरदेयम्

सुरनुतचरणेयम् ।। जननीयम्।।

वेदबृंहिता शास्त्रमण्डिता दर्शनसम्पदियम्

ऋषिमुनिमहिता कविकुलगीता भूतलरत्नमिदम् ।

वसुदा वसुधा सर्वसवित्री शर्मदभूमिरियम्

पुण्यधरित्री ज्ञानशेवधिस्सकलैर्वन्द्येयम्।।

जननीयम् .....

निरुपमसत्त्वा विविधगुणाढ्या संस्कृतिसारेयम्

सरससरिद्भिस्तुङ्गभूधरैर्भूषितकायेयम् ।

सस्यसमृद्धा सुभगनिसर्गा न्यक्कृतनाकेयम्

बाहुबलेड्या बहुबलधर्त्री धर्मविधात्रीयम्।।

जननीयम्....

निर्मलचित्तैस्तन्वा विभवैस्सदा हि सेव्येयम्

हृदि धरणीया सुतैस्समस्तैरनन्यशरणेयम् ।

भगिनि, भ्रातः, सुहृद्बान्धवाः, पूज्या मातेयम्

रात्रिन्दिवमप्यविरतमनसा ध्येया धरणीयम्।।

जननीयम्.....

*लेखक- जनार्दन हेगडे*

प्रयाणगीतम्

**(8) चन्दनतुल्या भारतभूमिः**

चन्दनतुल्या भारतभूमिस्तपस्थली ग्रामो ग्रामः ।

बाला-बाला देवी प्रतिमा वत्सो वत्सः श्रीरामः।

मन्दिरवत् पावनं शरीरं

सर्वो मानव उपकारी।

सिहा इह खेलनका जाता

गौरिह पूज्या जनयित्री।।

इह प्रभाते शङ्खध्वनिः सायं सङ्गीतस्वान्।

बाला-बाला देवी प्रतिमा वत्सो वत्सः श्रीरामः ।। (1)

अत्र कर्मतो भाग्यनिर्मितिः

पौरुषनिष्ठा कल्याणी।

अत्र त्यागतपस्या मिश्रा

गाथा गायति कविवाणी।।

अत्र ज्ञानप्रवाहो गङ्गासलिलनिर्मलो ह्यविरामः ।

बाला बाला देवीप्रतिमा वत्सो वत्सः श्रीरामः ।। (2)

अत्रत्यैः सैनिकैः समरभुवि

सदा गीयते श्रीगीता।

अत्र क्षेत्रे हलफालाधः

खेलति सुकुमारी सीता।।

अत्र जीवनादर्शे जटितो मङ्गलमयमणिरभिरामः ।

बाला बाला देवी प्रतिमा वत्सो वत्सः श्रीरामः ।। (3)

*लेखक- आचार्य रामनाथ सुमन*

**(9) एहि सुधीर ! एहि सुविक्रम !**

एहि सुधीर ! एहि सुविक्रम !

खेलनाङ्गणं गच्छाम।

धावन-कूर्दन-चलनैः खेलैः

वज्रकायतां विन्दाम।।

एहि सुशीले ! एहि मृणालिनि !

पुष्पवाटिकां गच्छाम ।

विविधैः कुसुमैर्विधाय मालां

विघ्नविनाशकमर्चाम ।

एहि दिनेश ! प्रणव ! गणेश !

ज्ञाननिधिं सञ्चिनुयाम।

एहि शारदे ! गिरिजे ! वरदे

ज्ञानवारिधौ विहराम।।

तन्वा मनसा हितं चरन्तः
सदा गुरून् अनुगच्छाम।
भारतमातुः सेवासत्कारः
देशहितार्थं जीवाम।।

*लेखक- जनार्दन हेगडे*

**(10) सर्वेषां नो जननी**

भारतधरणी कल्पलतेयं
जननी-वत्सल-तनय-गणैस्तत्
सम्यक् शर्म विधेयम् ॥ ध्रु॥

हिमगिरि-सीमन्तित-मस्तकमिदं
अम्बुधि-परिगत-पार्श्वं
अस्मज्जन्मदमन्नदमनिशं
श्रौतपुरातनमार्षम् ॥ १॥

विजनितहर्षं भारतवर्षं
विश्वोत्कर्षनिदानं

भारतशर्मणि कृतमस्माभिः

नवमिदमैक्यविधानम् ॥ २॥

भारतहितसम्पादनमेव हि

कार्यं त्विष्टविपाकं

भारतवर्जं न किमपि कार्यं

निश्चितमित्यस्माकम् ॥ ३॥

भारतमेका गतिरस्माकं

नापरास्ति भुवि नाम ।

सर्वादौ हृदयेन च मनसा

भारतमेव नमाम ॥ ४॥

*लेखक- राधानाथराय*

## खण्ड - 2

भारत-भारती-गीतिका

गीत-रचना तथा स्वर-रचना : डॉ. हरेकृष्ण-मेहेरः

('मातृगीतिकाञ्जलि:' - गीतिकाव्यात् समानीता )

= = = = = = = = = = = = =

### (1) विजयतां नो मातृभूमी भारतम्

विजयतां नो मातृभूमी भारतम्,

जयतु भारत-भारती नो

वेदभाषा संस्कृतम्,

लोकभाषा संस्कृतम् ॥ (ध्रुवम्)

*

साङ्गमखिलं वाङ्मयं यत्

सर्व-विद्या-शास्त्र-रुचिरम्,

अव्यया सा दिव्य-सम्पत्

सुप्रतिभया भाति सुचिरम् ।

भूतलेऽस्मिन् सभ्यतायाः सारभूतं निःसृतम्,

जयतु भारत-भरती नो वारयन्ती दुष्कृतम् ।

लोकभाषा संस्कृतम् ॥ (१)

*

भाति वाल्मीकीय-रचना

व्यास-सेव्या पावनी सा,

देव-संस्कृति-गौरव-धना

कालिदासोद्भावनी सा ।

मानविकता- भव्य-काव्यं भावुकैः समुदाहृतम्,

जयतु भारत-भारती नो विदधती गीतामृतम् ।

लोकभाषा संस्कृतम् ॥ (२)

*

काल-जयिनी कला-रत्ना

वर्ण-माल्या सुकल्याणी,

नित्य-नूत्ना निःसपत्ना

सर्वदा गीर्वाण-वाणी ।

यशो यस्या विमल-विशदं विश्व-भुवने स्वीकृतम्,

जयतु भारत-भारती नो विबुध-मनसां निर्वृतम् ।

लोकभाषा संस्कृतम् ॥ (३)

*

शुद्ध-पद्धति- सिद्ध-वेषा

सुधा-मधुरा पुण्य-धारा,

सा हि भाषा-जनन्येषा

सरस-धन्या सुसम्भारा ।

सपाश्चात्त्यै-र्विपश्चिद्भि- र्मुक्त-कण्ठै-र्व्याहृतम्,

जयतु भारत-भारती नो महाजनैः समादृतम् ।

लोकभाषा संस्कृतम् ॥ (४)

*

आर्य-धाम्ना समाम्नाता

सहृदयानां मोदिनीयम्,

मुख्य-भाषा सुविख्याता

शान्ति-समता- बोधिनीयम् ।

देश-संहति- विधौ मैत्री-व्रतं यया सदा धृतम्,

जयतु भारत-भारती नो भ्रातृ-भावैः संस्मृतम् ।

लोकभाषा संस्कृतम् ॥ (५)

= = = = = = = = = = = =

(इति भारत-भारती-गीतिका)

**(2) तदेव गगनं सैव धरा**

तदेव गगनं सैव धरा

जीवनगतिरनुदिनमपरा

तदेव गगनं सैव धरा।।

पापपुण्यविधुरा धरणीयं

कर्मफलं भवतादरणीयम्।

नैतद्-वचोऽधुना रमणीयं

तथापि सदसद्-विवेचनीयम्।।

मतिरतिविकला

सीदति विफला

सकला परम्परा। तदेव....

शास्त्रगता परिभाषाऽधीता

गीतामृतकणिकापि निपीता ।

को जानीते तथापि भीता

केन हेतुना विलपति सीता ।।

सुतरां शिथिला

सहते मिथिला

परिकम्पितान्तरा । तदेव.......

जनताकृतिः शान्तिसुखहीना

संस्कृति-दशाऽतिमलिना दीना।

केवल-निजहित-साधनलीना

राजनीतिरचना स्वाधीना ।।

न तुलसीदलं

न गङ्गाजलं

स्वदते यथा सुरा । तदेव.....

देवालयपूजा भवदीया

कथं भाविनी प्रशंसनीया।

धर्म-धारणा यदि परकीया

नैव रोचते यथा स्वकीया।।

भक्तिसाधनं

न वृन्दावनं

काशी वा मथुरा। तदेव..

स्पृहयति धनं स्वयं जामाता

परिणय-रीतिराविला जाता।

सुता न परिणीतेति विधाता

वृथा निन्द्यते रोदिति माता ॥

चरणवन्दनं

भीतिबन्धनं

मोहमयी मदिरा । तदेव ...

सपदि समाजदशा विपरीता

परम्परा व्यथते ननु भीता ।

अपरिचिता नूतननैतिकता

शनैः शनैः प्रतिगृहमापतिता ।।

त्यज चिरन्तनं

हृदयमन्थनं

गतिरपि नास्त्यपरा । तदेव....

भारतीयसंस्कृतिमञ्जूषा

प्रतिनवयुग-संस्कार-विभूषा ।

स्वर-परिवर्तन-कृताभिलाषा

सम्प्रति लोक-मनोरथभाषा ।

नवयुगोचिता

मनुज-संहिता

विलसतु रुचिरतरा। तदेव......

*लेखकः – श्रीनिवास रथ*

**(3) श्रावणमासे यमुनातीरे**

श्रावणमासे यमुनातीरे

खेलति राधा कुञ्जवने।

इह कदम्बशाखासु लम्बते

शुचिदोलासन्दानम्।

तत्र राजते मुग्धा राधा शुभसुवर्णपटले ।।

गौरतनौ शोभते सुरुचिरं

हरितपीतपरिधानम्

क्वणति नूपुरं रुनझुन-रुनझुन दोलासंचलने।।

दोलापटले राधामभितः

राजन्ते प्रियसख्यः

सर्सर्सर् धूयते दुकूलं प्राचीदिक्पवने।।

दोलायते नन्दगापालो

मुदा नोदते दोलाम्

क्वचिदायाति च नीचैर्दोला पुनर्याति गगने।।

श्यामघटाच्छादिताश्चाम्बरे

नृत्यति वने मयूरः

गोकुलग्रामे भरितोनव उल्लासो जने जने।।

*लेखिका- डॉ. नवलता*

**(4) घनावली समागताऽधुना**

सखि! श्यामला जने जने मुदावहा

घनावली समागताऽधुना। सखि ...

पादपेषु पल्लवेषु कुञ्जवल्लरीवनेषु

भूतलेऽखिलेऽभिरामतां वितन्वती,

घनवाली समागताऽधुना।। सखि! श्यामला......

मन्दमन्दमारुतेन कुञ्जकोकिलारुतेन,

शीतशीकरेण सर्वलोक-हर्षदा,

घनावली समागताऽधुना।। सखि! श्यामला.......

मत्तबर्हिणो वनेषु मत्तपक्षिणो द्रुमेषु,

मुग्धबालकाः प्रफुल्लिता गृहे गृहे,

घनावली समागताऽधुना।। सखि! श्यामला.....

नो तमो भुवं जहाति नो दिनं दिनं विभाति,

भानुभानवो दिवङ्गता पलायिता,

घनावली समागताऽधुना।।

सखि! श्यामला जने जने मुदावहा,

घनावली समागताऽधुना।

*लेखक- वासुदेव द्विवेदी शास्त्री*

**(5) अद्य राधिका (कज्जलीगीतम्)**

अद्य राधिका मुदा मया विलोकिता,

सखीजनेन सेविता दिने।

सखी च कृष्णरूपगा विभाति रासनर्तने।

तथा प्रसादिता लतागृहेऽनुधाविता ।।

सखीजनेन ....।।१।।

प्रियाः प्रसूनपुञ्जमध्यगं हसन्ति मोहनम्

सखे ! श्रिया यथा हरेर्मुखं विलोकितं

स्वभावनिर्मला मुदाऽयने ।।

अद्य राधिका ....।॥२॥

नन्दनन्दनं शुभं च कामरूपबल्लभं

प्रिया च राधिकाऽनुधाविता च मानिता ।। सखी०।

कृष्ण कृष्ण प्राणवल्लभ प्रिया त्वया निवारिता-

मया विचारितं त्वयाप्रिया सुधारिता।

सखीजनेन ....।।३।।

*लेखकः- आचार्य लालमणि पाण्डेयः*